No. ४६३१

Title वैधृति व्यतिपात संक्रांति जन्मादि शांतिः

Author ×

Extent ४ पत्राणि Age ×

Subject धर्मशास्त्रम्

सदंतजनन गोमुखप्रसव वैधृति व्यतिपात संक्रान्ति शान्तिः

पद्धतिः

अथ सदंतोत्पत्तिः शांतिः ॥ ॥ श्री ॥ विष्णुधर्मोत्तरे ॥ उपरि प्रथमं यस्य जायंते च शिशोर्द्विजाः ॥ द्विजा रताः ॥ दंतैर्वा सह यस्य
स्यात् जन्म भार्गवसत्तम ॥ मातरं पितरं वापि खादेदात्मानमेव वा ॥ तत्र शांतिं प्रवक्ष्यामि तां मे निगदतः शृणु ॥
गजपृष्ठगतं बालं नौस्थं वा स्नापयेद्द्विज ॥ तदभावे सर्वस्व कांचने वरासने ॥ सर्वौषधैः सर्वबीजैः सर्वपुष्प
फलैस्तथा ॥ पंचगव्येन रत्नैश्च मृत्तिकाभिश्च भार्गव ॥ सर्वौषध्यो निगदिताश्च विनायकस्नपने दर्शिताः ॥ स्थालीपाकेन धा
तारं पूजयेत्तदनंतरं ॥ सप्ताहं वात्र कर्त्तव्यं ततो ब्राह्मणभोजनं ॥ अष्टहनि विप्राणां तथा देया च दक्षिणा ॥ कांचनीर
जतं गांश्च तुवमाणारमेव तु ॥ दंतजन्मनि सामान्ये शृणु स्नानमतः परं ॥ भद्रासने निवेश्यैनं मृद्भिर्मूलैः फलै
स्तथा ॥ सर्वौषधैः सर्वगंधैः सर्वबीजैस्तथैव च ॥ स्नापये पूजयेच्चात्र वह्निसोमौ समीरिणां ॥ पर्वतांश्च तथा ख्याता
तां देवदेवं च केशवं ॥ एतेषामेव जुहुयात् घृतमग्नौ यथाविधि ॥ ब्राह्मणानां तु दातव्या यथाशक्त्या तु दक्षिणा ॥ ततस्तु जंक
ती बालं मासने वोपवेशयेत् ॥ आसीनं सूर्यसंतानबीजैः सुस्नापयेत्ततः ॥ सुविप्रबालकानां च तते च कार्यं च पूजनं ॥ प
न्यश्च विधिनाचार्यो ब्राह्मणस्तु कृदस्तथा ॥ इति सदंतोत्पत्तिः शांतिः ॥ श्री ॥ ॥ अथाधोमुखप्रसवः ॥ गर्गः ॥
पितृरिष्टे सुतारिष्टे मातृरिष्टे तथैव च प्रायश्चित्तं तदा कुर्यात्तत्र दोषस्य शांतये ॥ तादृशानन्तरं
त्पत्त्या सूचितेपि ग्राहरिष्टे प्रायश्चित्तमित्यत्रापि तत्तदरिष्टन्येति ॥ देहलीदापपतनं च दोषशां
त्यै तच्च प्रायश्चित्तं कुर्यादित्यर्थः ॥ एवमश्विनी गुरौ सर्पमघाचित्रे रमूलमेरेषु ऋक्षेषु जातस्य कुर्याज्जो
नेतथा ॥ जन्मर्क्षे वा त्रिजन्मर्क्षे शुभे वारे शुभे दिने ॥ [illegible] र्गादिकं सर्वं ग्रहाणां कारयेद्बुधः ॥ गोमयेनोपलिप्ता
गृहस्येशानभागके त्वीकत्तं कारयेत्कायुक्त्यरजोभिः श्वेतवर्णकैः

व्रीहींस्तत्र विनिक्षिप्य यथाविधानुसारतः ॥ नवशूर्पं लुतन्मध्ये रक्तवस्त्रं प्रसारयेत् ॥ स्थापयि
त्वा शिशुं तत्र पुनः सूत्रेण वेष्टयेत् ॥ प्राङ्मुखं तमवाक्पादं तिलगर्भगतं शिशुं ॥ गोमुखं दर्शयित्वा
दा। तु पुनर्जातं तु गोमुखात् ॥ विष्णुर्योनिमिति सूक्तेन गव्येन स्नापयेच्छिशुं ॥ गवामंगेषु मंत्रेण गवामंगे
संस्पर्शयेत् ॥ विष्णोः श्रेष्ठेन मंत्रेण गोप्रसूतं तु बालकं ॥ आचार्यस्तु समादाय पश्चान्मात्रे ददेत्तदा ॥
माताजघन्यनागस्थाच्छिशुमानीय तन्मुखात् ॥ ततः पित्रे तदा दद्यात्ततो मात्रे प्रदापयेत् ॥ वस्त्रे
स्थापयिता पश्चात्स्य पुत्रस्य मुखमीक्षयेत् ॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिश्च संप्लुतं ॥ आपो हि ष्ठा
दिभिर्मंत्रैर् निषिंचेत्ततः शिशुं ॥ मूर्ध्नि चाघ्राय तत्पुत्रं तन्मंत्रेण तु पिता ॥ अंगादंगात्संभवसि हृ
दयादधिजायसे ॥ आत्मा वै पुत्रनामासि स जीव शरदः शतं ॥ मूर्द्धनि त्रिरवघ्राय तं शिशुं स्थापये
त्ततः ॥ पुण्याहं वाचयेत्पश्चाद्ब्राह्मणैर्वेदपारगैः ॥ दरिद्राय च विप्राय तां गामन्यां प्रदापयेत् ॥
गोवस्त्रस्वर्णधान्यानि दद्याद्दर्कादिकः क्रमात् ॥ यथाशक्ति धनं दद्याद्ब्राह्मणेभ्यस्तदा पिता ॥ ॥२॥
ततो होमं प्रकुर्वीत स्वस्वशाखोक्तमार्गतः ॥ उद्धे खनेत्ततः कुर्यादाज्यभागांतमेव च ॥ होम
स्येशानदिग्भागे धान्योपरि स्थितं घटं ॥ पंचगव्यं प्रस्थाप्य तिलांस्तत्र विनिक्षिपेत् ॥ वस्त्र

॥अथ शक्रस्याष्टसंख्यया दधिमध्वाज्यसंयुतैः॥ आदित्यादिग्रहाणां च होमं कुर्यात्समीपके॥५॥ गावुपावता

डुमकषायांश्च पंचरत्नानि निक्षिपेत्॥ वस्त्रयुग्मेन संछाद्य गंधादिभिरथार्चयेत्॥ विष्णुं वरुणमन्यस्य प्रतिमा
वै विधानतः॥ प्रतिमायक्षमध्ये॥ अग्नेस्तद्दैवत्यहोमविधानात्॥ वकाराज्ञायलइंद्रादिनिर्मचैः॥ कुंभीस्पृष्ट्वाभिमंत्रये
त्॥ दधिमध्वाज्यस्रुक्तेन होमं कुर्याद्विधानतः॥ आपो हिष्ठेति तिस्रभिरप्सुमे सोम इत्यथापतद्विष्णोः परमं पदं मही
त्यातेयस्रुक्तत॥ ऋग्भिरग्निः प्रत्यृचं चाष्टाविंशतिसंख्यया॥श्री॥ अथ प्रयोगः॥ ॥मासपक्षाद्युल्लिख्यास्य शि
शोरमुकर्क्षोत्पत्तिसूचितारिष्टशांत्यर्थं गोमुखप्रसवं करिष्ये इत्युक्त्वा॥ गणेशपूजनाचार्यवरणं कुर्यात्॥ आ
चार्यः श्वेताष्टदलेव्रीहिस्थे शूर्पे रक्तवस्त्रं वितत्य तिलान्विकीर्य तत्र प्राङ्मुखं शिशुं संस्थाप्य सूत्रेणावेष्ट्य गोमुखा
त्प्रसवं च विचिंत्य विष्णुर्योनिमिति सूक्तेन पंचगव्येन शिशुं संस्थाप्य गवामंगेषिति गां स्पृष्ट्वा विष्णोः श्रेष्ठेनेति शि
शुं गृहीत्वा माताचेद्दद्यात्॥ माता गोमुखप्रदेशाच्छिशुमानीय गोपुच्छदेशे पित्रे दद्यात्॥ पिता च मात्रे दत्वा तत्र नव
वस्त्रे संस्थाप्य तन्मुखं दृष्ट्वा पंचगव्येनापो हिष्ठेति त्र्यृचेनाभिषिच्यागादगादिति त्रिसृर्ड्याघ्राय मात्रे दत्वा पुनरप्याहेवा
रयित्वा गां चाचार्याय दत्वा यदुद्दीत्यर्थं गोवत्सस्वर्णधान्यानि दत्वा भूयसीं दद्यात्॥ अथाचार्योग्निप्रतिष्ठापनं चक्षुषी आ
ज्येनेत्यंते वरुणं अप्सु मे सोम इत्यृचा आपो हिष्ठेति त्र्यृचं प्रतद्विष्णुस्तद्विष्णोरित्यृचा यक्षं अग्नि हुत्वा महीत्यामिति त्र्यृचा होमश्च
त्यृचमष्टाविंशत्यन्नम संख्याया दधिमध्वाज्यैः शेषेण स्विष्टकृतमित्यादि धुन्त्वाज्यभागांतं कृत्वाग्नेरीशान्यां कुंभं सं
स्थाप्य तत्र पंचगव्यं तिलव्रीहीन् क्षीरद्रुमकषायान् पंचरत्नानि च निधाय वस्त्रयुग्मेनावेष्ट्य पूर्णपात्रोपरि तद्विष्णोरिति वि
ष्णोः स्तवाया मीति वरुणस्याहीति त्यामीतिय स्म घ्न य प्रतिमान्यर्चयित्वा तद्रेलिषद्वोजला न्वाध्यान क्रमेण हुत्वा कर्मशेषं
समापयेदिति॥ गोमुखप्रसवप्रयोगः समाप्तः॥श्री॥ अथ वैधृतिव्यतीपातसंक्रांतिशांतिः॥ शौनकः॥ कुमारजन्मका
ले व्यतीपाते च वैधृतिः॥ संक्रमश्च रवेस्तत्र जातो दारिद्र्यकारकः॥ दरिद्राणां महादुःखं व्याधिपीडासमुद्भवं अपि,

२

योमृत्युमाप्नोति नात्र कार्या विचारणा ॥ धनं च शोकं दुःखं च सर्वनाशकरो नवेत् ॥ शांतिर्वा पुष्कलाकार्या
तस्य शौचं दोषोनकश्चन गोमुखप्रसवं कुर्यात् शांतिं कुर्यात्प्रयत्नतः ॥ जपाभिषेकदानैश्च होमादपि विशेषतः ॥ न
वग्रहमखं कुर्यात्तस्य दोषोपशांतये ॥ प्रथमं गोमुखं जन्मततः शांतिं समाचरेत् ॥ गृहस्य पूर्वदिग्भागे
गोमयेनानुलिप्य वा भूमिं हस्तसुदेशे तु व्रीहिराशिं प्रकल्पयेत् ॥ पंचद्रोणमितं धान्यं तदर्धं तंदुलेन च ॥
तदर्धं तु तिलैः कुर्यादन्योन्योपरि कल्पयेत् ॥ व्यंचितयराशौ तु अष्टपत्रं लिखेद्बुधः ॥ कुर्यादहि वा राशि
तु आचार्य वस्त्रं तु पुरा ॥ पाद्यार्घ्य वर्तीं च मध्ये कुंभं जलेन पूर्णं बिनं मन्त्रात् स्थापयेन्नच सेशांतिका
मंत्रेण कोविदः ॥ पंचांगमृत्पंचगव्यं पंचत्वचस्तथा गंधपल्लवाः ॥ रत्नौषधि तिष्ठितं कुंभे पवित्रैः सुम
नोहरैः ॥ तीर्थोदकेन संपूर्णं सर्वौषधिसमन्वितम् ॥ सगव्यगंधवस्त्रेण युग्मेन वेष्टयेत्
तस्योपरि न्यसेत्पात्रं स्वर्णं सम ब्रह्मसंपुटे ॥ प्रतिमां स्थापयेद्धीमान् साधिप्रत्यधिदेवताः ॥ ब्रह्मादित्याहुतोपाधौ
मध्ये वैष्णवीं तिमर्चयेत् ॥ एवमेव व्यतीपाते शांतौ संक्रमणस्य तु ॥ भानो रूपं चरतो रुद्रमग्निं दक्षिणतो व
जेत् ॥ निष्कमात्रेण वार्धेन पादेनापि स्वशक्तितः ॥ प्रतिमां कारयेद्धीमान् ॥ स्वचतुर्भुजं शाणलक्षितां प्र
तिमां पूजनार्थाय वस्त्रयुग्मं निवेदयेत् ॥ अधिदेवो भवेत्सूर्यश्चंद्रः प्रत्यधिदैवतं ॥ ततो व्याहृतिरक ॥२॥
णतत्र मंत्रेण पूजयेत् ॥ त्रैयंबकेन मंत्रेण प्रधानप्रतिमां यजेत् ॥ तत्स्वरूपं इति मंत्रेण स्वरूपं पूजां समा

वरेत्। आप्यायस्वेति मंत्रेण सोमपूजां समाचरेत्। उपचारैः षोडशभिर्यद्वा पंचोपचारकैः। अर्घ्यदीपा
गंधपुष्पाद्यैः फलैर्नैवेद्यमर्पयेत्। मृत्युंजयेन मंत्रेण प्रधानप्रतिमां स्पृशेत्। अष्टोत्तरसहस्रं
वा अष्टोत्तरशतं तु वा। अष्टाविंशतिवा यथा पूजा पाठ स्वशक्तितः। सर्वं सौरं प्रजप्याथ सोमं वसो
ममंत्रतः। आनोभद्रेति सूक्तं च नद्रा अग्नेति सूक्तकौ जपेच्च पौरुषसूक्तं त्र्यंबकमतः परं कुंभं
स्पृष्ट्वा चतुर्दिक्षु जपेत् कुंडस्य पश्चिमतः कुंभस्य पश्चिमे देशे स्थंडिलेग्निं प्रकल्पयेत्। स्वगृह्योक्त
विधानेन कारयेत् स्थालीपाकान् तेन त्र्यंबकेन मंत्रेण समिदाज्यचरून् हुनेत्। अष्टोत्तरसहस्रं वा अष्टो
त्तरशतं तु वा। अष्टाविंशतिवा कुर्यात् स्वस्य शक्त्यनुसारतः। मृत्युंजयेन मंत्रेण तिलहोमं समाचरे
त्। ततः स्विष्टकृतं हुत्वा अभिषेकं च कारयेत्। समुद्रज्येष्ठा सूक्तेन आपोहिष्ठा त्र्यचेन च। अहीन्याभिरि
सूक्तेनैः पावमानीभिरेव च। त्र्यंबकेन तत्सूर्य आप्यायस्वेति मंत्रतः। सुरास्त्वाभिर्ति मंत्रेण अ
भिषेकं समाचरेत्। सुरास्त्वामभिषिंचंत्वित्यादिकोऽभिषेकमंत्रः समुद्रायो पुनर्होमविधानेऽपि
च। अभिषेकाच्छुतेव स्त्रमाचार्याय निवेदयेत्। श्वेतवस्त्रधरो भूत्वा भूषणाद्यैरलंकृतः। यज
मानः स्त्रिया युक्त आचार्याद्या वेसरण माचरेद्। आचार्यं पूजयेत्पश्चाद् दत्त्वा हेमा गुलीयकैः। गोदानं च

स्थानेन स्वर्णदानेन विशेषतः । तद्दोषशमनार्थाय आचार्याय प्रदापयेत् । प्रच्छादनपटं दद्या
त्ततः शान्तिर्भवेदिति । जापकेभ्यो ब्राह्मणेभ्यो दक्षिणां प्रतिपादयेत् । दानोपकरणेभ्यश्च
प्रदद्याद्भू प्रदद्याद्भूरिदक्षिणां । ब्राह्मणान्शतसंख्याकान्मिष्टान्नैर्भोजयेत्सुतान् । बंधु
भिः सह भुञ्जीत यथाविभवसारतः । एवं यः कुरुते मर्त्यो नैव दुःखमवाप्नुयात् । आयुरारो
3 ग्यमैश्वर्यं मातापित्रोः शिशोरपि ॥ श्री ॥ ॥ अथ प्रयोगः ॥ कर्त्ता गोमुखप्रसवं कृत्वा
मासपक्षाद्युल्लिख्यास्य शिशोर्वैधृतौ व्यतीपाते संक्रान्त्यां चोत्पत्त्या सूचितस्यानिष्टस्य नि
रासार्थं शान्तिं करिष्य इति संकल्प्य । गणेशपूजास्वस्तिवाचनमातृकापूजावृद्धिश्राद्धाचा
र्यादिवरणानि कुर्यात् । अथाचार्यः सर्षपविकरणादि कृत्वा प्राच्यां गोमयोपलिप्तं कुवि
पंचद्रोणात्तदर्द्धं तदर्द्धमितान्क्रमाद्व्रीहितंडुलतिलानन्योन्योपरि राशीकृत्य तत्राष्ट
दलं विरच्य तत्कर्णिकायां कुंभं संस्थाप्य तीर्थोदकेनापूर्य तत्र सप्तपंचपल्लवरत्नगव्या ॥३॥
व्याष्टगंधसर्वौषधीः क्षिप्त्वा वस्त्रयुग्मेनावेष्ट्य पूर्णपात्रं निधाय तत्र वैधृतिव्यतीपात
तयोः शान्तौ मध्ये त्र्यंबकमिति रुद्रं तद्दक्षिणे तत्सूर्यमुच्चरत आप्यायस्वेति सोमं । संक्रांति

शांतौ मध्ये सूर्यं । तद्दक्षिणतोऽग्निं दूतं इत्यग्निमुत्तरतो रुद्रं तत्तज्जातिमास्वावाहयेत् षो
डशभिः पंचभिर्वोपचारैः संपूज्य रुद्रसूर्यप्रतिमाः स्पृष्ट्वाष्टसहस्राष्टशताष्टाविंशत्य
न्यतर्यसंख्यया मृत्युंजयमंत्रमुपजप्य घृत्योदि सर्वसौरमंत्रानाप्यायस्वेति ऋचमार्जयेत्
संक्रांतिशांतौ तु पूर्वं सौरं जपस्ततो मृत्युंजयजपः । तत्र संस्थितेः प्रागादिदिक्क्रमेण ।
इपानो नः शा । नद्रा अग्नेः सहस्रशीर्षा कद्रुद्रायेति सूक्तानि जपित्वा कुर्यात् पश्चिमेऽग्नि
संस्थाप्य ग्रहावाहनादि पूर्वोक्तं कृत्वान्वाधानं ततः । तत्र च ह्रुषी आज्येनेत्यंते ग्रहास
मिद्भिर्वाज्यैः प्रतिद्रव्यमष्टाविंशत्यष्टान्यतरसंख्यया अधिदेवताप्रत्यधिदेवता यथा
शक्तिसंख्यया रुद्रसूर्यसोमान् समिद्भिर्वाज्यैस्तच्चरुणैश्चैर्मृत्युंजयमंत्रेण च तिलाहुति
भिरष्टसहस्राष्टशताष्टाविंशत्यन्यतमसंख्यया शेषेण स्विष्टकृतमित्यादि व्यतीपातसं
क्रांतिशांतौ तु सूर्याग्निरुद्रानिति विशेषः । ततः प्राश्य भागाते न्वाधानक्रमेण कृत्वा
बलिदानांते कलशोदकैः समुद्रज्येष्ठा इति सूक्तेनापोहिष्ठेति तिसृभिः चेनास्त्रीन्यामिति सूक्ते
न पावमानीभिः प्रधानाधिप्रत्यधिदेवतामंत्रैः सुरास्त्वेत्यादि पौराणैश्चाभिषिंचेय

त्रमानो निषेकवस्त्रमाचार्याय निवेद्यान्यमवेक्ष्य पूर्णाहुतिं कृत्वाचार्याय धेनुं वस्त्रयुग्मां

गुलीयकांस्त्विग्भ्यश्च दक्षिणां दत्वान्येभ्यश्च भूरिदक्षिणां दत्वा शतं शक्त्या वा ब्रा

ह्मणान्भोजयित्वा बंधुभिः सह भुंजीतेति वैधृतिव्यतीपातसंक्रांतिशांतयः ॥

॥ इति शांतिसमाप्तिः ॥ श्री ॥

दंतजननगोमुखप्रसववैधृतिव्यतिपातसंक्रांतिशांतयः

नक्षत्रसांती

॥४॥